SN – 111

ST. CLARET COLLEGE LIBRARY

**III Semester B.C.A. Examination, Nov./Dec. 2014**
**(2012-13 and Onwards) (Freshers + Repeaters)**
**LANGUAGE SANSKRIT (Paper – III)**
**Naganandam (I – III Acts) and Comprehension**

Time : 3 Hours | Max. Marks : 100

***Instructions*** : *1) Answer in* ***Sanskrit/Kannada/English****.*
*2) Question Nos.* ***I*** *and* ***VII*** *should be answered in* ***Sanskrit only****.*

I. **पञ्चदश** प्रश्नानाम् उत्तराणि **संस्कृत** भाषया लिखत । (15×1=15)

ಕೆಳಗಿನವುಗಳಲ್ಲಿ ಹದಿನೈದು ಪ್ರಶ್ನೆಗಳಿಗೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿ.

Answer **any fifteen** questions in **Sanskrit**.

1) हर्षवर्धनस्य नाटकानि कानि ?
2) विदूषकस्य नाम किम् ?
3) मित्रावसोः पिता कः ?
4) गुरुशुश्रूषार्थं जीमूतवाहनः किं त्यजति ?
5) मलयवती काम् आराधयति ?
6) चतुरिका का ?
7) विटः कः ?
8) मलयवत्याः हृदयं कथं दोलायते ?
9) नागानन्दनाटकं किमाधारितम् ?
10) जीमूतवाहनस्य प्रतिपक्षः कः ?
11) कुलपतिः कः ?
12) नागानन्दनाटके कति अङ्काः सन्ति ?
13) चेटी कं वर्णयति ?
14) जीमूतकेतुः कुत्र गन्तुम् इच्छति ?

P.T.O.

15) यौवनं कस्यास्पदं भवति ?

16) लोके किं हारि वर्तते ?

17) तापसः कः ?

18) सुखनिमीलितलोचना आकर्णयन्तः इव के लक्ष्यन्ते ?

19) देवालये मलयवती किं कुर्वन्ती आसीत् ?

20) उद्यानपालिका का ?

II. **द्वयोः** प्रश्नयोः उत्तराणि लिखत । **(2×12=24)**

ಕೆಳಗಿನವುಗಳಲ್ಲಿ **ಎರಡು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ.

Answer **any two** of the following questions.

1) "जीमूतवाहनः धीरशान्त नायकः" निरूपयत ।

"ಜೀಮೂತವಾಹನನು ಧೀರಶಾಂತ ನಾಯಕ" ನಿರೂಪಿಸಿ.

Justify that "Jeemutavahana is a धीरशान्त नायकः" ।

2) मलयवत्याः पात्रपरिचयं कुरुत ।

ಮಲಯವತಿಯ ಪಾತ್ರವನ್ನು ಚಿತ್ರಿಸಿ.

Sketch the character of Malayavathi.

3) नागानन्दनाटकस्य कर्तुः देश–काल–कृतीः अधिकृत्य प्रबन्धं लिखत ।

ನಾಗಾನಂದ ನಾಟಕದ ಕರ್ತೃವಿನ ದೇಶ, ಕಾಲ ಕೃತಿಗಳನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on place, date and works of the author of Nagananda.

III. **द्वयोः** श्लोकयोः अनुवादं कृत्वा विवृणुत । **(2×6=12)**

**ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ.

Translate and explain **any two** of the following verses.

1) श्रीहर्षो निपुणः कविः परिषदप्येषागुणग्राहिणी
लोके हारि च बोधिसत्त्वचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ।।

2) स्थान प्राप्त्या दधानं प्रकटितगमकां मन्द्रतारव्यवस्थां
   निर्ह्लादिन्या विपञ्च्या मिलितमलिरुतेन तन्त्रीस्वरेण।
   एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य
   व्याजिह्याङ्गाः कुरङ्गाः स्फुटललिपदंगीतमाकर्णयन्ति।।

3) दक्षिणं स्पन्दते चक्षुः फलाकांक्षा न मे क्वचित्।
   न च मिथ्या मुनिवचः कथयिष्यति किं न्विदम्।।

4) चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम।
   चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः।।

IV. **एकस्य** गद्यभागस्य अनुवादं कुरुत। **(1×8=8)**

ಒಂದು ಗದ್ಯ ಭಾಗವನ್ನು ಅನುವಾದ ಮಾಡಿ.

Translate **any one** of the prose passages.

नायकः – यद्येवं, तत् किं न स्यात् ? ननु स्वशरीरात् प्रभृति सर्वं परार्थमेव मया परिपाल्यते। यत्तुस्वयं न दीयते, तत् तातानुरोधात्। तत् किमनेनावस्तुना चिन्तितेन ? वरं ताताज्ञैवानुष्ठिता। आज्ञापितश्चास्मि तातेन, यथा – 'वत्स जीमूतवाहन ! बहुदिवस परिभोगेण दूरीकृत समित्कुशकुसुममुपभुक्तमूलफलकन्दनीवारप्रायमिदं स्थानं वर्तते। तदितो मलयपर्वतं गत्वा किञ्चित् तस्मिन् निवासयोग्यमाश्रमपदं निरूपय' इति। तर्हि मलयपर्वतमेव गच्छावः।

विदूषकः – यद् भवानाज्ञापयति। एतु भवान्।

**अथवा/ಅಥವಾ/OR**

मित्रावसुः – (प्रविश्य) कुमार ! मित्रावसुः प्रणमामि।

नायकः – (दृष्ट्वा) मित्रावसो। स्वागतम्! इतः स्थीयताम्।

चेटी – भर्तृदारिके आगतो भर्ता मित्रावसुः।

नायिका – हञ्जे ! प्रियं मे।

नायकः – मित्रावसो ! अपिकुशली सिद्धराजो विश्वावसुः ?

मित्रावसुः – कुशली तातः। तातस्सन्देशेनास्मि त्वत् सकाशमागतः।

नायकः – किमाह तत्र भवान्।

V. **चतुर्णां** ससन्दर्भं विवृणुत। **(4×4=16)**

ನಾಲ್ಕಕ್ಕೆ ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿ.

Annotate **any four** of the following.

1) किमिदम् अकारणं रुद्यते।

2) वन्द्याः खलु देवताः।

3) ननु हृदयस्थितो वरो देव्या दत्तः।

4) उष्णः खल्वेष कदलीदलमारुतः।

5) मत्तपालक ! कुतोऽत्र नवमालिका ?

6) साधूक्तं नायं गुरुजनमतिक्रामति।

VI. विषय**द्वय**मधिकृत्य लघुटिप्पणीं लिखत। **(2×5=10)**

ಎರಡು ವಿಷಯಗಳಿಗೆ ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any two**.

1) जीमूतवाहनः।

2) सूत्रधारः।

3) आत्रेयः।

4) मित्रावसुः।

VII. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। **(5×3=15)**

अस्मिन् संसारे सर्वे जीविनः सुखप्राप्तये उद्योगशीलाः दृश्यन्ते। उद्योगिनः मनुष्याः धनं प्राप्य सुखं लभन्ते। उद्योगेन एव धनवन्तः भवन्ति। उद्योगः प्राणिनां नियतोधर्मः। उद्योगेनैव असम्भवान्यपि सम्भवानि, दुःसाध्यानि अपि सुसाध्यानि भवन्ति। उद्योगेनैव सर्वं फलति। देवाः अपि तस्यैव साहाय्यं कुर्वन्ति, यः प्रयत्नशीलोऽस्ति। निरुद्योगिनः राष्ट्रस्य घातकाः भवन्ति। श्रीकृष्णः अपि कर्मयोगं बोधयति कुत्रापि कर्माणि विना उद्योगं साफल्यं न भवति। राष्ट्रस्य सर्वाङ्गीणा समुन्नतिः उद्योगेनैव जायते।

**प्रश्नाः :**

1) कीदृशाः मनुष्याः सुखं लभन्ते ?

2) उद्योगेन कानि कानि साधनानि भवन्ति ?

3) देवाः कस्य साहाय्यं कुर्वन्ति ?

4) श्रीकृष्णः किं बोधयति ?

5) राष्ट्रस्य समुन्नतिः केन जायते ?